श्रीः ।

श्रीमते रामानुजाय नमः ।

श्रीभगवद्रामानुजविरचित नित्यग्रन्थः

अथ परमैकान्तिनो भगवदाराधनप्रयोगं वक्ष्ये ॥

भगवत्कैङ्कर्यैकरतिः परमैकान्ती भूत्वा भगवानेव स्वशेषभूतेन मया स्वकीयैश्च कल्याण-तमैरौपचारिकसांस्पर्शिकाभ्यवहारिकैर्भोगैरखिलपरिजनपरिच्छदान्वितं स्वात्मानं प्रीतं कारयितुमुपक्रमत इत्यनुसन्धाय, तीर्थं गत्वा, शुचौ देशे पादौ प्रक्षाल्याचम्य, तीरं संशोध्य, शुचौ देशे मूलमन्त्रेण मृदमादाय, द्विधा कृत्वा शोधिततीरे निधाय, एकेनाधिकभागेन देहमलप्रक्षालनं कृत्वा, निमज्ज्य, आचम्य, प्राणायामत्रयम् आसीनो भगवन्तं ध्यायन् कृत्वा, अन्यं मृद्भागमादाय वामपाणितले त्रिधा कृत्वा, पृथक्पृथक् संप्रोक्ष्य अभिमन्त्र्य एकेन दिग्बन्धनमस्त्रमन्त्रेण कुर्यात् ॥

अन्येन तीर्थस्य पीठम् ॥ इतरेण गात्रानुलेपनम् ॥

ततः पाणी प्रक्षाल्य उदकाञ्जलिमादाय तीर्थस्यार्घ्यमुत्क्षिप्य भगद्रामपादाङ्गुष्ठविनिस्सृतगङ्गाजलं संकल्पितपीठे आवाह्य, अर्घ्यं दत्वा, मूलमन्त्रेणाभिमन्त्र्य, उदकाञ्जलिमादाय, सप्तकृत्वोऽभिमन्त्र्य स्वमूर्धनि सिञ्चेत् ॥ एवं त्रिः पञ्चकृत्वः सप्तकृत्वो वा ॥

दक्षिणेन पाणिना जलमादाय अभिमन्त्र्य पीत्वा आचम्य स्वात्मानं संप्रोक्ष्य (परिषिच्य) तीर्थे निमग्नो भगवत्पादारविन्दविन्यस्तशिरस्को यावच्छक्ति मूलमन्त्रं जपित्वा, उत्तीर्य शुक्लवस्त्रधरो धृतोत्तरीयश्च आचम्य, ऊर्ध्वपुण्ड्रांस्तत्तन्मन्त्रेण धारयित्वा, भगवन्तमनुस्मृत्य, तत्तन्मन्त्रेण भगवत्पर्यन्ताभिधायिना मूल-मन्त्रेण च जलं पीत्वा, आचम्य, प्रोक्ष्य, परिषिच्य, उदकाञ्जलिं भगवत्पादयोर्निक्षिप्य, प्राणानायम्य, भगवन्तं ध्यात्वा, अष्टोत्तरशतं मूलमन्त्रमावर्त्य, परिक्रम्य, नमस्कृत्य, आधारशक्त्यादिपृथिव्यन्तं तर्पयित्वा, श्रीवैकुण्ठादि-पारिषदान्तं तर्पयित्वा, देवानृषीन् पितॄन् भगवदात्मकान् ध्यात्वा संतर्प्य, वस्त्रं शुचौ देशे संपीड्य, आचम्य, आवाहिततीर्थं मूलमन्त्रेणात्मनि समाहृत्य, यागभूमिं गच्छेत् ॥

सुप्रक्षालितपाणिपादः स्वाचान्तः शुचौ देशेऽतिमनोहरे निश्शब्दे भुवं संगृह्य, तां शोषणादिभि र्विशोध्य, गुरुपरंपरया परमगुरुं भगवन्तमुपगम्य, तमेव प्राप्यत्वेन प्रापकत्वेनानिष्टनिवारकत्वेनेष्टप्रापकत्वेन च यथावस्थितस्वरूपरूपगुणविभूतिलीलोपकरणविस्तारमनुसन्धाय, तमेव शरणमुपगच्छेदखिलेत्यादिना ॥

एवं शरणमुपगम्य तत्प्रसादोपबृंहितमनोवृत्तिः तमेव भगवन्त सर्वेश्वरेश्वरमात्मनस्स्वामित्वेनानुसन्धाय, अत्यर्थप्रियाविरतविशदतमप्रत्यक्षरूपानुध्यानेन ध्यायन्नासीत ॥ ततस्तदनुभवजनितातिमात्रप्रीतिकारितपरिपूर्ण-कैङ्कर्यरूपपूजामारभेत ॥

भगवानेव स्वनियाम्यस्वरूपस्थितिप्रवृत्तिस्वशेषतैकरसेनानेनात्मना स्वकीयैश्च देहेन्द्रियान्तःकरणैः स्वकीयकल्याणतमद्रव्यमयानौपचारिकसांस्पर्शिकाभ्यवहारिकादिसमस्तभोगान् अतिप्रभूतानतिसमग्रानतिप्रियतमा-नत्यन्तभक्तिकृतान् अखिलपरिजनपरिच्छदान्विताय स्वस्मै स्वप्रीतये स्वयमेव प्रतिपादयितुमुपक्रमत इत्यनु-सन्धाय, स्वदेहे पञ्चोपनिषन्मन्त्रान् संहारक्रमेण न्यस्य, प्राणायामेनैकेन दक्षिणेन पाणिना नाभिदेशे मूलमन्त्रं न्यस्य, मन्त्रोद्भूतचण्डवाय्वाप्यायितनाभीदेशस्थवायुना शरीरमन्तर्बहिश्च सर्वतत्त्वमयं तत्त्वक्रमेण विशोष्य, पुमरपि प्राणायामेनैकेन हृदेशे मूलमन्त्रं न्यस्य, मन्त्रोद्भूतचक्राग्निज्वालोपबृंहितजाठराग्निना दग्धतत्तत्समष्टिप्रलीनसर्वतत्त्वसर्वकिल्बिषसर्वाज्ञानतद्वासनो भूत्वा, भगवद्दक्षिणपादाङ्गुष्ठे मूलमन्त्रेण स्वात्मानं प्रवेशयेत् ॥

अपरेण प्राणायामेन भगवत्प्रसादेन भगवत्किङ्करत्वयोग्यतामापाद्य, तस्मादुदञ्च, तद्वामपादाङ्गुष्ठा-धस्तान्मूलमन्त्रेणात्मानं विन्यस्य, देववामपादाङ्गुष्ठनखशीतांशुमण्डलनिर्गलद्दिव्यामृतरसैरात्मानमभिषिच्य, भगवत्प्रसादेन तदमृतमयं सर्वकैङ्कर्यमनोहरं सर्वकैङ्कर्ययोग्यं शरीरं लब्ध्वा, तस्मिन् शरीरे पञ्चोपनिषन्मन्त्रान् सृष्टिक्रमेण विन्यस्येत् । ओं षां नमः पराय परमेष्ठ्यात्मने नमः इति मूर्ध्नि स्पृशेत् । ओं यां नमः पराय पुरुषात्मने नम इति नासाग्रे । ओं रां नमः पराय विश्वात्मने नम इति हृदये । ओं वां नमः पराय निवृत्त्यात्मने नम इति गुह्ये । ओं लां नमः पराय सर्वात्मने नम इति पादयोः । एवं न्यासं कुर्वंस्तत्तच्छक्ति-मयमुद्भूतदेहं ध्यायेत् ।

पुनरपि प्राणायामेनैकेन भगवद्वामपादाङ्गुष्ठविनिस्सृतामृतधारयाऽऽत्मानमभिषिच्य कृतलाञ्छनो धृतोर्ध्वपुण्ड्रो भगवद्यागमारभेत ॥

भगवानेव सर्वं कारयतीति पूर्ववत् ध्यात्वा, हृद्यागं कृत्वा, संभारान् संभृत्यात्मनो वामपार्श्वे जलकुम्भे तोयमुत्पूर्य, गन्धपुष्पयुतं कृत्वा, सप्तकृत्वोऽभिमन्त्र्य, विशोष्य, दग्ध्वा, दिव्यामृततोयमुत्पाद्य,

अस्त्रमन्त्रेण रक्षां कृत्वा, सुरभिमुद्रां प्रदर्श्य, अन्यानि पूजाद्रव्याणि आत्मनो दक्षिणपार्श्वे निधाय, आत्मनः पुरतस्त्वास्तीर्णे पीठे क्रमेणाग्नेयादिकोणेष्वर्घ्यपाद्याचमनीयस्नानीयपात्राणि निधाय, (अस्त्र) मन्त्रेण प्रक्षाल्य, शोषणादिना पात्राणि विशोध्य, संस्कृततोयेन तानि पूरयित्वा, अर्घ्यपात्रे गन्धपुष्पकुशाग्राक्षतादीनि निक्षिपेत् । दूर्वां विष्णुपर्णीं श्यामाकं पद्मकं पाद्यपात्रे । एलालवङ्गतक्कोलल ामज्जकजातीपुष्पाण्याचमनीये । [द्वे हरिद्रे मुराशैलेयतक्कोलजटामांसीमलयजगन्धचम्पकपुष्पाणि स्नानीये] सिद्धार्थकादीनि स्नानीये ॥

अन्यस्मिन् पात्रे सर्वार्थतोयं संकल्प्य ततोऽर्घ्यपात्रं पाणिना स्पृष्ट्वा, मूलमन्त्रेणाभिमन्त्र्य, ओं नमो भगवतेऽर्घ्यं परिकल्पयामीत्यर्घ्यं परिकल्पयेत् ॥ एवं पाद्यं परिकल्पयामीति पाद्यम् । आचमनीयं परिकल्पयामीत्याचमनीयम् । स्नानीयं परिकल्पयामीति स्नानीयम् । शुद्धोदकं परिकल्पयामीति शुद्धोदकम् । ततोऽर्घ्यजलात् जलमन्येन पात्रेणादाय यागभूमिं सर्वाणि यागद्रव्याण्यात्मानं च [प्रत्येकं] प्रोक्ष्यासनं परिकल्पयेत् ॥

ओं आधारशक्तये नमः, ओं मूलप्रकृत्यै नमः, ओं अखिलजगदाधाराय कूर्मरूपिणे नारायणाय नमः, ओं भगवतेऽनन्ताय नागराजाय नमः, ओं [भूं] भूम्यै नमः इति यथास्थानमुपर्युपरि ध्यात्वा प्रणम्य, ओं श्रीवैकुण्ठाय दिव्यलोकाय नमः इति [श्रीवैकुण्ठ] दिव्यलोकं प्रणम्य, ओं श्रीवैकुण्ठाय दिव्यजनपदाय नमः इति दिव्यजनपदं प्रणम्य, ओं श्रीवैकुण्ठाय दिव्यनगराय नमः इति दिव्यनगरं प्रणम्य, ओं श्रीवैकुण्ठाय दिव्यविमानाय नमः इति दिव्यविमानं प्रणम्य, ओं आनन्दमयाय दिव्यमण्टपरत्नाय नमः इति मण्टपरत्नं प्रणम्य, तस्मिन्, अनन्ताय [नागराजाय] नमः इत्यास्तरणं प्रणम्य, तस्मिन्नुपरि, ओं धर्माय नमः इत्याग्नेय्यां पादं विन्यस्य, ओं ज्ञानाय नमः इति नैर्ऋत्याम्, ओं वैराग्याय नमः इति वायव्याम्, ओं ऐश्वर्याय नमः इत्यैशान्याम्, ॐ अधर्माय नमः इति प्राच्यां पीठ गात्रं विन्यस्य, ॐ अज्ञानाय नमः इति दक्षिणस्याम्, ओं अवैराग्याय नमः इति प्रतीच्याम्, ओं अनैश्वर्याय नमः इत्युत्तरस्याम्, एभिः परिच्छिन्नतनुं पीठभूतं सदात्मकमनन्तं विन्यस्य, पश्चात् सर्वकार्योन्मुखं विभुमनन्तम्– ओं अनन्ताय नमः इति विन्यस्य, तस्मिन्नुपरि ओं पद्माय नमः इति पद्मं विन्यस्य, तत्पूर्वपत्रे ॐ विमलायै (चामरहस्तायै) नमः इति विमलां चामरहस्तां विन्यस्य, तत आरभ्य प्रादक्षिण्येनैशानान्तं पत्रेषु ओं उत्कर्षिण्यै (चामरहस्तायै) नमः, ओं ज्ञानायै (चामरहस्तायै) नमः ओं क्रियायै (चामरहस्तायै) नमः ओं योगायै (चामरहस्तायै) नमः, ओं प्रह्वै (चामरहस्तायै) नमः, ओं सत्यायै (चामरहस्तायै) नमः, ओं ईशानायै (चामरहस्तायै) नमः– इति सप्त शक्तीश्चामरहस्ता विन्यस्य, ओं अनुग्रहायै (चामरहस्तायै) नमः इति कर्णिकापूर्वभागेऽनुग्रहां चामरहस्तां विन्यस्य, ओं जगत्प्रकृतये योगपीठाय नमः इति योगपीठं विन्यस्य, ओं [दिव्याय योगपर्यङ्काय] दिव्ययोगपीठपर्यङ्काय नमः इति दिव्ययोग [पीठ]

पर्यङ्कं विन्यस्य, तस्मिन्ननन्तं नागराजं सहस्रफणाशोभितम् ओं अनन्ताय नागराजाय नमः इति विन्यस्य, ओं अनन्ताय नमः इति पुरतः पादपीठं विन्यस्य, सर्वाण्याधारशक्त्यादीनि पीठान्तानि तत्त्वानि प्रत्येकं गन्धपुष्पधूपदीपैरभ्यर्च्य, सर्वपरिवाराणां तत्तत्स्थानेषु पद्मासनानि संकल्प्य, अनन्तगरुडविष्वक्सेनानां सपीठकं पद्मं विन्यस्य, सर्वतः पुष्पाक्षतादीनि विकीर्य, योगपीठस्य पश्चिमोत्तरदिग्भागे ओं अस्मद्गुरुभ्यो नमः इति गुरून् गन्धपुष्पधूपदीपैस्संपूज्य, प्रणम्यानुज्ञाप्य भगवद्यागमारभेत ॥

कल्पिते नागभोगे समासीनं भगवन्तं नारायणं पुण्डरीकदलामलायताक्षं किरीटमकुटकेयूरहारकटकादि-सर्वभूषणैर्भूषितं आकुञ्चितदक्षिणपादं प्रसारितवामपादं जानुविन्यस्तप्रसारितदक्षिणभुजं नागभोगविन्यस्तवाम-भुजम् ऊर्ध्वभुजद्वयेन शङ्खचक्रधरं सर्वेषां सृष्टिस्थितिप्रलयहेतुभूतमब्जनाभं कौस्तुभेन विराजमानं चकासत-मुदग्रप्रबुद्धस्फुरदपूर्वाचिन्त्यपरमसत्त्वपञ्चशक्तिमयविग्रहं पञ्चोपनिषदैर्ध्यात्वा, आराधनाभिमुखो भवेति [मूल-मन्त्रेण] प्रार्थ्य, मूलमन्त्रेण दण्डवत्प्रणम्य, उत्थाय, स्वागतं निवेद्य, यावदाराधनसमाप्ति सान्निध्ययाचनं कुर्यात् ॥

अन्यत्र स्वाभिमतदेशे पूजा चेदेवमावाहनम्—

मन्त्रयोगस्समाह्वानं करपुष्पोपदर्शनम् । बिम्बोपवेशनं चैव योगविग्रहचिन्तनम् ॥
प्रणामश्च समुत्थानं स्वागतं पुष्पमेव च । सान्निध्ययाचनं चेति तत्राह्वानस्य सत्क्रियाः ॥

ततो भगवन्तं प्रणम्य दक्षिणतः, ओं श्रीं श्रियै नम इति श्रियमावाह्य प्रणम्य, वामतः ओं भूं भूम्यै नम इति भुवमावाह्य, तत्रैव ओं नीं नीलायै नम इति नीलामावाह्य, ओं किरीटाय मकुटाधिपतये नम इत्युपरि भगवतः पश्चिमपार्श्वे चतुर्बाहुं चतुर्वक्त्रं कृताञ्जलिपुटं मूर्ध्नि भगवत्किरीटं धारयन्तं किरीटाख्यदिव्य-पुरुषं प्रणम्य, एवमेव ओं किरीटमाल्यायापीडकात्मने नम इत्यापीडकं तत्रैव• (पुरस्तात्) प्रणम्य, ओं दक्षिणकुण्डलाय मकरात्मने नमः इति दक्षिणकुण्डलं दक्षिणतः प्रणम्य, ओं वामकुण्डलाय मकरात्मने नमः इति वामकुण्डलं वामतः प्रणम्य, ओं वैजयन्त्यै वनमालायै नम इति वनमालां पुरतः प्रणम्य, ओं श्रीतुलस्यै नम इति तुलसीं (देवीं) पुरतः प्रणम्य, ओं श्रीवत्साय श्रीनिवासाय नम इति श्रीवत्सं पुरतः प्रणम्य, ओं हाराय सर्वाभरणाधिपतये नम इति हारं पुरतः प्रणम्य, ओं श्रीकौस्तुभाय सर्वरत्नाधिपतये नम इति कौस्तुभं पुरतः प्रणम्य, ओं काञ्चीगुणोज्ज्वलाय पीताम्बराय नम इति पीताम्बरं पुरतः प्रणम्य, ॐ सर्वेभ्यो भगव-द्भूषणेभ्यो नम इति सर्वभूषणानि सर्वतः प्रणम्य, ओं सुदर्शनाय हेतिराजाय नम इति सुदर्शनं रक्तवर्णं रक्तनेत्रं (द्वि) चतुर्भुजं कृताञ्जलिपुटं भगवन्तमालोकयन्तं तद्दर्शनानन्दबृंहितमुखं मूर्ध्नि भगवच्चक्रं धारयन्तं

दक्षिणतः प्रणम्य, ओं नन्दकाय खड्गाधिपतये नम इति नन्दकात्मानं शिरसि भगवत्खड्गं धारयन्तं तत्रैव प्रणम्य, ओं पद्माय नम इति पद्मं (पद्मं शिरसि धारयन्तं) प्रणम्य, ओं पाञ्चजन्याय शङ्खाधिपतये नम इति शङ्खात्मानं सितवर्णं (रक्तनेत्रं) द्विभुजं कृताञ्जलिपुटं शिरसि भगवच्छङ्खं धारयन्तं वामतः प्रणम्य, ओं कौमोदक्यै गदाधिपतये नम इति गदात्मानं तत्रैव प्रणम्य, तत्रैव ओं शार्ङ्गाय चापाधिपतये नम इति शार्ङ्गात्मानं प्रणम्य, ओं सर्वेभ्यो भगवद्दिव्यायुधेभ्यो नम इति सर्वायुधानि परितः प्रणम्य, ओं सर्वाभ्यो भगवत्पादारविन्दसंवाहिनीभ्यो नम इति दिव्यपादारविन्दसंवाहिनीस्समन्ततः प्रणम्य, ॐ अनन्ताय नागराजाय इति पृष्ठतोऽनन्तं (भगवन्तं) नागराजं चतुर्भुजं हलमुसलधरं कृताञ्जलिपुटं फणामणिसहस्रमण्डितोत्तमाङ्गं भगवन्तमालोकयन्तं भगवत्स्पर्शनानन्दबृंहितसर्वगात्रं ध्यात्वा प्रणम्य, ॐ सर्वेभ्यो भगवत्परिजनेभ्यो नम इत्यनुक्तानन्तपरिजनान् समन्ततः प्रणम्य, ओं भगवत्पादुकाभ्यां नम इति भगवत्पादुके पुरतः प्रणम्य, ओं सर्वेभ्यो भगवत्परिच्छदेभ्यो नम इति सर्वपरिच्छदान् समन्ततः प्रणम्य, ओं वैनतेयाय नम इत्यग्रतो (भगवतो भगवन्तं) वैनतेयमासीनं द्विभुजं कृताञ्जलिपुटं ध्यात्वा प्रणम्य, ओं नमो भगवते विष्वक्सेनायेति भगवतः प्रागुत्तरपार्श्वे दक्षिणाभिमुखं भगवन्तं विष्वक्सेनमासीनं चतुर्भुजं शङ्खचक्रधरं कृताञ्जलिपुटं नीलमेघनिभं ध्यात्वा प्रणम्य, ओं गं गजाननाय नमः, ओं जं जयत्सेनाय नमः, ओं हं हरिवक्त्राय नमः, ओं कं कालप्रकृतिसंज्ञाय नमः, ओं सर्वेभ्यो भगवद्विष्वक्सेनपरिजनेभ्यो नमः इति विष्वक्सेनपरिजनान् प्रणम्य, ओं चण्डाय द्वारपालाय नमः, ओं प्रचण्डाय द्वारपालाय नमः इति पूर्वद्वारपार्श्वयोः प्रणम्य, ओं भद्राय द्वारपालाय नमः, ओं सुभद्राय द्वारपालाय नमः इति दक्षिणद्वारपार्श्वयोः प्रणम्य, ओं जयाय द्वारपालाय नमः, ओं विजयाय द्वारपालाय नमः इति पश्चिमद्वारपार्श्वयोः प्रणम्य, ॐ धात्रे द्वारपालाय नमः, ॐ विधात्रे द्वारपालाय नमः इत्युत्तरद्वारपार्श्वयोः प्रणमेत् ॥

एते द्वारपालास्सर्वे शङ्खचक्रगदाधरा आज्ञामुद्रायुता ध्यातव्याः ॥

ॐ सर्वेभ्यो भगवद्द्वारपालेभ्यो नम इति सर्वद्वारेषु सर्वद्वारपालान् प्रणम्य, ॐ कुमुदाय गणाधिपतये सवाहनपरिवारप्रहरणाय नम इति पूर्वस्यां दिशि पार्षदेश्वरं कुमुदं प्रणम्य, ॐ कुमुदाक्षाय गणाधिपतये सवाहनपरिवारप्रहरणाय नम इत्याग्नेय्यां कुमुदाक्षं प्रणम्य, ॐ पुण्डरीकाय गणाधिपतये सवाहनपरिवारप्रहरणाय नम इति दक्षिणस्यां पुण्डरीकं प्रणम्य, ॐ वामनाय गणाधिपतये सवाहनपरिवारप्रहरणाय नम इति नैर्ऋत्यां वामनं प्रणम्य, ॐ शङ्कुकर्णाय गणाधिपतये सवाहनपरिवारप्रहरणाय नम इति पश्चिमस्यां शङ्कुकर्णं प्रणम्य, ॐ सर्पनेत्राय गणाधिपतये सवाहनपरिवारप्रहरणाय नम इति वायव्यां सर्पनेत्रं प्रणम्य, ॐ सुमुखाय गणाधिपतये सवाहनपरिवारप्रहरणाय नम इत्युदीच्यां सुमुखं प्रणम्य, ॐ सुप्रतिष्ठिताय गणाधि-

पतये सवाहनपरिवारप्रहरणाय नम इत्यैशान्यां सुप्रतिष्ठितं प्रणम्य, ॐ सर्वेभ्यो भगवत्पारिषदेभ्यो नम इति सर्वस्माद्बहिः प्रणमेत् ॥

अन्यत्रावाह्य पूजायामावाहनस्थानानि परमव्योमक्षीरार्णवादित्यमण्डलहृदयानि मधुराद्वारकागोकुलायोध्यादीनि दिव्यावतारस्थानानि चान्यानि पौराणिकानि श्रीरङ्गादीनि च यथारुचि ॥

एवं भगवन्तं नारायणं देवीभूषणायुधपरिजनपरिच्छदद्वारपालपारिषदैस्सेव्यमानं स्वाधीनत्रिविधचेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेदं क्लेशकर्माद्यशेषदोषासंस्पृष्टं स्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजःप्रभृत्यसंख्येयकल्याणगुणगणौघमहार्णवं ध्यात्वा, प्रणम्य, मूलमन्त्रेण स्वात्मानं देवाय निवेद्य, प्रणम्यानुज्ञाप्य, भगवत्पूजामारभेत ॥

पात्रेण पूर्वस्थापितार्घ्यपात्रादर्घ्यजलमादाय पाणिभ्यां मुखसममुद्धृत्य, भगवन्! इदं प्रतिगृह्णीष्वेति चिन्तयन् भगवन्मुखे दर्शयित्वा भगवद्दक्षिणहस्ते किंचित्प्रदायार्घ्यं प्रतिग्रहपात्रे प्रक्षिपेत् । हस्तौ प्रक्षाल्य पादयोः पुष्पाणि समर्प्य पाद्यपात्रात्पाद्यजलमादाय पादयोः किंचिद्दत्वा मनसा पादौ प्रक्षालयन् पाद्यं प्रतिग्रहपात्रे निक्षिपेत् । (हस्तौ प्रक्षाल्य) वस्त्रेण पादौ संमृज्य गन्धपुष्पाणि दत्वा, आचमनीयपात्रादाचमनीयमादाय भगवद्दक्षिणहस्ते किंचित्प्रदाय भगवद्वदने आचमनीयं समर्पितमिति मनसा भावयन् शेषमाचमनीयं प्रतिग्रहपात्रे निक्षिपेत् । ततो गन्धपुष्पधूपदीपाचमनमुखवासताम्बूलादिनिवेदनं कृत्वा, प्रणम्यात्मानमात्मीयं च सर्वं भगवन्! नित्यकिंकरत्वाय स्वीकुर्विति भगवते निवेदयेत् । ततः स्नानार्थमासनमानीयं गन्धादिभिरभ्यर्च्य भगवन्तं प्रणम्यानुज्ञाप्य, पादुके प्रदाय, तत्रोपविष्टे माल्यभूषणवस्त्राण्यपनीय, विष्वक्सेनाय दत्वा, स्नानशाटिकां प्रदाय, पाद्याचनीयपादपीठप्रदानदन्तकाष्ठजिह्वानिर्लेहनगण्डूषमुखप्रक्षालनाचमनादर्शप्रदर्शनहस्तप्रक्षालनमुखवासताम्बूलतैलाभ्यङ्गोद्वर्तामलकतोयकङ्कतप्लोतदेहशोधनशाटिकाप्रदानहरिद्रालेपनप्रक्षालनवस्त्रोत्तरीययज्ञोपवीतप्रदानपाद्याचमनपवित्रप्रदानगन्धपुष्पधूपदीपाचमननृत्तगीतवाद्यादिसर्वमङ्गलसंयुक्ताभिषेकैकनीराजनाचमनदेहशोधन — प्लोतवस्त्रोत्तरीययज्ञोपवीताचमनकूर्चप्रसारणसहस्रधाराभिषेकनीराजनाचमनदेहशोधनप्लोतवस्त्रोत्तरीययज्ञोपवीताचमनानि दद्यात् ॥

ततोऽलङ्कारासनमभ्यर्च्य प्रणम्यानुज्ञाप्य, पादुके प्रदाय, तत्रोपविष्टे पूर्ववत् स्नानीयवर्जमर्घ्यपाद्याचमनीयशुद्धोदकानि मन्त्रेण कल्पयित्वा भगवते गन्धपुष्पपादसंमर्दनवस्त्रोत्तरीयभूषणोपवीतार्घ्यपाद्याचमनीयानि दत्वा, सर्वपरिवाराणां स्नानवस्त्रादिभूषणान्तं दत्वा, गन्धादीन् देवानन्तरं सर्वपरिवाराणां प्रत्येकं प्रदाय, धूपदीपाचमनीयानि दद्यात् ॥ अथवा सर्वपरिवाराणां गन्धादीनेव दद्यात् ॥

गन्धपुष्पप्रदानालङ्काराञ्जनोर्ध्वपुण्ड्रादर्शधूपदीपाचमनध्वजच्छत्रचामरवाहनशङ्खचिह्नकाहलभेर्यादिसकल-नृत्तगीतवाद्यादिभिरभ्यर्च्य मूलमन्त्रेण पुष्पं प्रदाय, प्रत्यक्षरं पुष्पं प्रदाय द्वादशाक्षरेण विष्णुषडक्षरेण विष्णु-गायत्र्या पञ्चोपनिषदैः पुरुषसूक्तर्ग्भिरन्यैश्च भगवन्मन्त्रैश्शक्तश्चेत्पुष्पं प्रदाय, देव्यादिदिव्यपारिषदान्तं तत्तन्मन्त्रेण पुष्पं दत्वा प्रणम्य, प्रतिदिशं प्रदक्षिणप्रणामपूर्वकं भगवते पुष्पाञ्जलिं दत्वा पुरतः प्रणम्य, श्रुतिसुखैः स्तोत्रैः स्तुत्वा आत्मानं नित्यकिंकरतया निवेद्य, तथैव ध्यात्वा, यथाशक्ति मूलमन्त्रं जपित्वा, सर्वभोगप्रपूरणीं मात्रां दत्वा, मुखवासताम्बूले प्रदाय, अर्घ्यं दत्वा, भोज्यासनमभ्यर्च्य प्रणम्योनुज्ञाप्य पादुके प्रदाय, तत्रोपविष्टे पाद्याचमनीयार्हणानि दत्वा, गुडं माक्षिकं सर्पिर्दधि क्षीरं चेति पात्रे निक्षिप्य शोषणादिभिर्विशोध्य, अर्घ्यजलेन संप्रोक्ष्य, मधुपर्कमवनतशिरा हर्षोत्फुल्लनयनो हृष्टमना भूत्वा प्रदायाचमनीयं दद्यात् । यत्किंचिद्द्रव्यं भगवते दीयते तत्सर्वं शोषणादिभिर्विशोध्यार्घ्यजलेन संप्रोक्ष्य दद्यात् ॥

ततश्च गां स्वर्णरत्नादिकं च यथाशक्ति दद्यात् । ततस्सुसंस्कृतान्नमाज्याढ्यं दधिक्षीरमधूनि च फलमूलव्यञ्जनानि मोदकांश्चान्यानि च लोके प्रियतमान्यात्मनश्चेष्टानि शास्त्राविरुद्धानि संभृत्य शोषणादिभि-र्विशोध्यार्घ्यजलेन संप्रोक्ष्यास्त्रमन्त्रेण रक्षां कृत्वा, सुरभिमुद्रां प्रदर्श्य अर्हणपूर्वकं हविर्निवेदयेत् ॥ अतिप्रभूत-मतिसमग्रमतिप्रियतममत्यन्तभक्तिकृतमिदं स्वीकुर्विति प्रणामपूर्वकमत्यन्तसाध्वसविनयावनतो भूत्वा निवेदयेत् ॥

ततश्चान्नपानतर्पणे प्रदाय हस्तप्रक्षालनाचमनहस्तसंमार्जनचन्दनमुखवासताम्बूलादीनि दत्वा प्रणम्य पुनर्मन्त्रासनं कूर्चेन मार्जयित्वा, अभ्यर्च्यानुज्ञाप्य, पादुके प्रदाय तत्रोपविष्टे माल्यादिकमपोह्य विष्वक्सेनाय दत्वा, पाद्याचमनीयगन्धपुष्पधूपदीपाचमनापूपफलादीनि दत्वा, आचमनमुखवासताम्बूलनृत्तगीतवाद्यादिभि-रभ्यर्च्य, प्रदक्षिणीकृत्य दण्डवत्प्रणम्य, पर्यङ्कासनमभ्यर्च्यानुज्ञाप्य पादुके प्रदाय, तत्रोपविष्टे पाद्याचमने दत्वा माल्यभूषणवस्त्राण्यपनीय, विष्वक्सेनाय दत्वा सुखशयनोचितं सुखस्पर्शं च वाससस्तदुचितानि भूषणान्युपवीतं च प्रदायाचमनीयं दत्वा गन्धपुष्पधूपदीपाचमनमुखवासताम्बूलादिभिरभ्यर्च्य श्रुतिसुखैः स्तोत्रैरभिष्टूय भगवानेव स्वनियाम्यस्वरूपस्थितिप्रवृत्तिस्वशेषतैकरसेनानेनात्मना स्वकीयैश्च देहेन्द्रियान्तःकरणैः स्वकीयकल्याणतमद्रव्य-मयानौपचारिकसांस्पर्शिकाभ्यवहारिकादिसमस्तभोगानतिप्रभूतानतिसमग्रानतिप्रियतमानत्यन्तभक्तिकृतानखिलपरि-जनपरिच्छदान्विताय स्वस्मै स्वप्रीतये स्वयमेव प्रतिपादितवानित्यनुसंधाय, भगवन्तमनुज्ञाप्य, भगवन्निवेदित-हविश्शेषाद्विष्वक्सेनाय किंचिदुद्धृत्य निधायान्यत्सर्वं स्वाचार्यप्रमुखेभ्यो वैष्णवेभ्यो दत्वा, भगवद्यागावशिष्टै-र्जलादिभिर्द्रव्यैर्विष्वक्सेनमभ्यर्च्य, पूर्वोद्धृतं हविश्च दत्वा, तदर्चनं परिसमाप्य, भगवन्तमष्टाङ्गेन प्रणामेन प्रणम्य शरणमुपगच्छेत् ॥

मनोबुद्ध्यभिमानेन सह न्यस्य धरातले ।
कूर्मवच्चतुरः पादान् शिरस्तत्रैव पञ्चमम् ॥

प्रदक्षिणसमेतेन त्वेवंरूपेण सर्वदा ।
अष्टाङ्गेन नमस्कृत्य ह्युपविश्याग्रतः प्रभोः ॥

इत्युक्तोऽष्टाङ्गप्रणामः । शरणागतिप्रकारश्च पूर्वोक्तः ॥

ततोऽर्घ्यजलं प्रदाय भगवन्तमनुज्ञाप्य पूजां समापयेत् ॥

इति श्रीभगवद्रामानुजविरचितो नित्यग्रन्थस्समाप्तः ॥